सख्यौ । शाकुंतलां विलोक्य । हद्धि २ अंतलिहिदा सउन्तला वणराइए · काश्यप · सानि
श्वासं । अनसूये गतवती सहधर्मचारिणी निगृह्य शोकमनुगच्छतं मां · प्रस्थितेउभे · ४०
तादसउंदला विरहिदं सुण्णं विअ तवोवणं कहं पविसामो । काश्यप । स्नेहप्रवृत्तिरेवं द

गौतमी। एसो बहुजनस्स मज्झवदेसो। जादे एहि खु वत्ते ओधारेहि। काश्यपः। वत्से परिष्वजस्व मां
सखीजनं च। शकुं। ताद इदो किंपि अंवदामिस्सा सहीओ णिवत्तिस्संति।। काश्यपः। वत्से इ
मे अपि प्रदेये। न युक्तमनयोस्तत्र गंतुं। त्वया सह गौतमी यास्यति। शकुं। पितरमाश्लिष्य।। क
हं दाणिं तादस्स अंकादो परिब्भट्ठा मलयतडुम्मूलिआ चंदणलदेव देसंतरे जीविअं धारयि
स्सं। काश्यपः। वत्से किमेवं कातरासि। अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे वि ३९
भवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।। तनयमचिरात् प्राचीवार्कं प्रसूय च पाव
नं मम विरहजां न त्वं वत्से शुचं गणयिष्यसि। शकुं। पितुः पादयोः पतति। काश्यप। यदिच्छामि

स्माएहंमंतस्स्माद्दिणिवेतेउ्लवं।काश्यप।वच्छेउपकथ्यतेतपोनुष्ठानं।शाकुंतला।तूयःपित
रमा।उत्सृष्य।तवचलणपडिदंतादस्सरीरं। तामाश्चद्दिमेत्तंमम।किदेउक्कंठि डे।काश्यप।वत्सेनिस्य
से।शममेष्यतिममशोकः।कथंनुवच्छेत्वयारचितपूर्वं।उटजद्दाराविरूढंनीवारबलिं
३९ विलोकयतः।गच्छशिवास्तेपंथानः।सखी।निक्रांताशाकुंतला।स हेया।चिन्त्य॥
सखो।शाकुंतला।विलोक्य।हद्धि।अंतालिहदाम्हउन्नता।वणराइए।काश्यप।सानि
श्वासं।अनसूयेगतवतीस्तहधर्मचारिणी।निग्रहशोकमनुगच्छतीमां।प्रस्थितेउभे। ४०
तादसउंदला।विराहिदंसुण्णंविअतवोवणं।कहंपविसामो।काश्यप।।स्नेहप्रवृत्तिरेवंद

तेन हि ॥ शाकु । सख्यौ तु पेत्याह । हला दुवे वि मं समं परिस्सजथ । सख्यौ तथा कृत्वा । सहि
जइ णाम सो राआ पच्चहिण्णाणमंथरो भवे तदो । से । अत्तणामहेअंकिदं अंगुलीअअं दंसे
हि । शाकु । इमिणा संदेहेण वो आकंपिदह्मि । सख्यौ मा भाआहि । सिणेहो पावसंकी । शार्ङ्ग र । भ
गवन् युगांतरमारूढः सविता । त्वरतां भवती । शाकु । आश्रमाभिमुखी स्थित्वा । ताद कदा णु
क्खु भूओ तवोवणं पेक्खिस्सं । काश्यप । श्रूयतां । भूत्वा चिराय चतुरंतमहीसपत्नी दौष्यंति
निवेश्य पश्चात् मप्रतिरथं तनयं प्रसूय । भर्त्रा तदर्पितकुटुंबभरेण सार्द्धं शांते करिष्यसि पदं पुनराश्रमे
स्मिन् । गौतमी । जादे परिहीअदि गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेण वि पुणो पुणो ए

स्मितंकरे। राजा। अहोरागपरिवाहिनीगीतिः। विदू०। किंदावगीदीए अवगदो अक्खरत्थो।।
राजा।। स्मितंकृत्वा। सखे नूनंकृतप्रणयोयंजनः। तदस्यादेवीवसुमतीमंतरेणमदुपालंभमधि
गतोस्मि। सखेमैमढयमहवनाइच्यतोहंसपादिका। निपुणमुपलब्धोस्मीति। विदू०। उंलवं
अणिवेदिश्याय लोवअस्स गहिदस्स तए परकीएहिं हत्थेहिं सिहंडएण उज्झमाणस्स अ चूडाय
40 सत्ता एवीदरा अस्स वि अणुगदाणिं मे मोक्खो। राजा। गच्छनागरिकवृत्त्यासंज्ञापयैनां। विदू०
कामदीनिःक्रान्तः राजा। आत्मगतं। किन्नुखलुगीतार्थमाकर्ण्यइष्टजनविरहादृतेपिबलवदु ४१
त्कंठितोस्मि। अथवारम्याणिवीक्ष्यमधुरांश्चनिशम्यशब्दान्पर्युत्सुकोभवतियत्सुखि
७२

र्शिनी। सविमर्शं परिक्रम्य। हंत भोः शकुंतलां प्रति विसृज्य लब्धमिदानीं स्वास्थ्यं।
कुतः। अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः। जातो ममायं विशदः
प्रकामं प्रत्यर्पितन्यास इवांतरात्मा॥ ।इति परिक्रम्य॥ ॥निःक्रांताः सर्वे चतुर्थोंकः॥
ततः प्रविशत्यासनस्थो राजा विदूषकश्च। विदू० कर्णं दत्वा। भो भो वअस्स संगीदसालंतरे
अवधाणं देहि। कलविसुद्धाए गीदीए सरसंजोओ सुणीअदि। जाणे तत्तहोदी हंसवदिआ
वण्णपरिअअं करेदि त्ति। राजा। तूष्णीं भव। यावदाकर्णयामि। आकाशे गीयते। अहिणव
महुलोलुवो भवं तह परिचुंबिअ चूअमंजरिं। कमलवसइमेत्तणिव्वुदो महुअर विम्हरिदो

रिकमन्यावलोक्य च। एषदेवः प्रजाः प्रजाः स्वाइवतीं चयित्वा निषेवते शांतमनाः विविक्तैंर्यूथानि सं
चार्यरवि प्रतप्तः शीतं दिवास्थानामिवद्विपेंद्रः॥ उपगम्य। जयतुदेवः। एतेखलुहिमवतो गि
रेरुपत्यकारण्यवासिनः काश्यपसंदेशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः। एतस्तु
42 त्वादेवः प्रमाणं। राजा॥ सादरं। किंकाश्यपसंदेशहारिणः। कंचु॰ अथकिं। राजा॰। तेनहि
मद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः। अमूनाश्रमवासिनः श्रौतेनविधिनासत्कृत्य
स्वयमेवप्रवेशयितुमर्हसीति। अहमप्यत्रतपस्विदर्शनोचितेप्रदेशेस्थितः प्रतिपालया ४२
मि। कंचु॰। यदाज्ञापयतिदेवइति निःक्रांतः। राजा॥ उत्थाय। वेत्रवति अग्निशरणमार्ग

तोपिजंतुः। तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननांतरसौहृदानि। पर्याकुल
स्तिष्ठति· ततः प्रविशति कंचुकी· कंचुकी। अहो रवस्वी ईदशीमवस्थां प्रतिपन्नोस्मि। आचा
र इत्यवहितेन मया गृहीता या वेत्रयष्टिरवरोधगृहेषु राज्ञः। काले गते बहुतिथे मम सै
व जाता प्रस्थान विक्लवगतेरवलंबनार्था। भोः कामं धर्मकार्यमनतिपात्यं देवस्य। तथापि
इदानीमेव धर्मासनादुत्थितस्य पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयि
५२ तुं॰ अविश्रामो लोकतंत्राधिकारः। कुतः। भानुः सकृद्युक्ततुरंग एव रात्रिंदिवं गंधवहः प्रयाति॥
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः। यावन्नियोगमनुतिष्ठामि। प

एतेन क्रीतमनसः पुनर्नवीकृताः स्मः।परिक्रामति॰ प्रतीहारी। अहिणवसंमज्जणसस्सिरीओ।

४२ सण्णिहिदहोमधेणू अग्गिसरणालिंदो आरुहदु देवो।राजा।आरुह्य परिजनांसावलंबी तिष्ठति॰

अपराधैर्वा वेत्रवति किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः॥ ॥किं तावद्व्रतिनामु

५ पोढतपसां विघ्नैस्तपो दूषितं धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितं॥ आहोस्वित्प्रसवो

दुरदृष्टैः = ममापचरितैर्विष्टंभितो वीरुधामित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः। प्रतीहारी। सुच

रिदाणंदिणो इसओ देवं सभाजयिदुं आअदेत्ति तक्केमि। ततः प्रविशंति गौतमीसहिताः शकुंत

लां पुरस्कृत्य मुनयः पुरश्चैषां पुरोहितश्च। कंचुकी। इदो इदो भवंतः। शार्ङ्ग। शारद्वत। ॥महाभागः ४२

कामं नरपतिरभिन्नस्थितिरसौ न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते। तथापीदं शश्वत्परिचि

पुरोहितर

मादेशाय। प्रतीहारी॰ इदो इदो देवो॰ राजा॰ परिक्रामति। अधिकारखेदं निरूप्य। सर्वः प्रार्थितम
र्थं मधिगम्य सुखी संपद्यते जन्तुः। राज्ञां तु चरितार्थता दुःखोत्तरैव। औत्सुक्यमात्रमवसा
दयति प्रतिष्ठा। क्लिश्नाति लब्धपरिपालनवृत्तिरेव। नातिश्रमापनयनाय यथा श्रमाय राज्यं
स्वहस्तधृतदण्डमिवातपत्रं। नेपथ्ये॰ वैतालिकौ॰ विजयतां देवः। प्रथमः। स्वसुखनिरभिलाषः खि
द्यसे लोकहेतोः प्रतिदिनमथवा ते वृत्तिरेवंविधैव। अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं शमय
ति परितापं छायया संश्रितानां। द्वितीयः। नियमयसि कुमार्गप्रस्थितानात्तदण्डः प्रशमयसि विवा
दं कल्पसे रक्षणाय। अतनुषु विभवेषु ज्ञातयः सन्तु नाम त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानां। राजा॥
तु

वै॰ ऐश्वर्यपरोपकारिणं। प्रतीहारी। देव पसाअसुहवण्णा दीसंति जाणामि वीसद्धकज्जा इसीओ। राजा॰
शकुंतलां दृष्ट्वा॰ अथ यावगुंठनवती॥ कौ। स्विदेवगुंठनवती नातिविस्फुट शरीरलावण्या। मध्येत
पोधनानां किसलयमिव पाण्डुपत्राणां। प्रतीहारी। देव कुदूहल गब्भो पहिदो ण मे तक्को पसीदादि
णं दंसणीया उण से आकिदी लक्खी। अदि॰ राजा। भवतु अनिर्वर्णनीयं परकलत्रं॰ शकुं॰। हस्त
मुरसि कृत्वा। आत्मगतं। हिअअ किं एव्वं वेवासि। अज्ज उत्तस्स भावं ओधारिअ धीरं दाव होहि। पुरो
हितः पुरो गच्छ। एते विधिवदर्चितास्तपस्विनः। कश्चिदेषामुपाध्यायसंदेशः तं श्रोतुमर्हति॥ ४४

तविविक्तेनमनसाजनाकीर्णंमन्येहुतवहपरीतंगृहमिव।शारद्व॰।स्थानेभवान्पुरप्रवेशादित्थंभू
तःसंवृत्तः।अहमपि।अभ्यक्तमिवस्नातःशुचिरशुचिमिवप्रबुद्धइवसुप्तं।बद्धमिवस्वैरगतिर्जनमि
हसुखसंगिनमवैमि।शकुं।दुर्निमित्तंसूचयित्वा।अंमहेकिंमेवामेदरंणअणंविप्फुरदि।गौ
तमी।जादेपडिहदममंगलं।सुहाइंदेभत्तुकुलदेवदाओवितरंतु॥परिक्रामति॰।पुरोहितः।रा
जानंनिर्दिश्य॰भोतपस्विनःअसावत्रभवान्वर्णाश्रमाणांरक्षिताप्रागेवमुक्तासनोवःप्रति
पालयति॰पश्यतैनं।शार्ङ्ग।काममेतदभिनंदनीयं।तथापिवयमत्रमध्यस्थाः।कुतः।भवंतिन
म्रास्तरवःफलागमैर्नवांबुभिर्दूरविलंबिनोघनाः।अनुद्धताःसत्पुरुषाःसमृद्धिभिःस्वभाव

44

तदिदानीमापन्नसत्वा प्रतिगृह्यतां सहधर्मचरणायेति । गौतमी । अज्ज किंपि वत्तुकामम्हि । ण मे
वअणावसरो अत्थि कहं त्ति । णोपेक्खिदो गुरुअणो इमाए ण तुए पुच्छिदो बंधुअणो । एक्कक्क
मेव चरिए भणामि किं एक्कमेक्कस्स । शकु । आत्मगतं । किं णु खु अज्जउत्तो भणादि । राजा । कि
मिदमुपन्यस्तं । शकु । आत्मगतं । पावओ क्खु वअणोवण्णासो । शार्ङ्ग । कथमिदं नाम । भवंत
एव सुतरां लोकवृत्तान्तनिष्णाताः । सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं वि
शङ्कते । अतः समीपे परिणेतुरिष्यते तदप्रियापि प्रमदा स्वबन्धुभिः ॥ राजा । किंचात्रभवती मया ४५
परिणीतपूर्वा । शकु । सविषादमात्मगतं । हिअअ संपदं दे आसंका । शार्ङ्ग । किं कृतकार्यद्वेषो

परस्परे एक
कः भणामि ति ।
इति देशीकारः ।

किंइति सर्वत्र योजनीयः

राजा। अवहितोऽस्मि। ऋषयः हन्तमुद्यम्य। विजयस्व राजन्। राजा॥ सर्वानभिवादये। ऋषयः। इष्टे
न युज्यस्व। राजा। अपि निर्विघ्नतपसो मुनयः। ऋषयः। कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्व
यि। तमस्तपति घर्मांशौ कथमाविर्भविष्यति। राजा। अर्थवान्खलु मे राजशब्दः। अथ भगवा
न्लोकानुग्रहाय कुशली काश्यपः। ऋषयः। स्वाधीनकुशलाः सिद्धिमन्तः। स भवन्तमनाम
यप्रश्नपूर्वकमिदमाह। राजा। किमाज्ञापयति भगवान्। शार्ङ्गरवः। यन्मिथः समवादिमां दुहितरं
भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुमतं। कुतः। त्वमर्हतां प्राग्रहरः स्मृतोऽसि यत्कु ८२
न्तला मूर्तिमती च सत्क्रिया। समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यो न गतः प्रजापतिः।

रहस्यंकथ्यतेन्यस्यपरावृत्यापवारितं २

45

स्वीकरणमवलत्याः स्मरामि तत्कथमिमामभिव्यक्तसत्वलक्षणां प्रत्यात्मानं क्षेत्रिणमा
शंकमानः प्रतिपत्स्ये। शकुं। अपवार्य। अज्जउत्तस्स परिणए एव्व संदेहो। कुदो दाणिं मे दूरा
धिरोहिणी आसा। शार्ङ्ग। मा तावत्। कृताभिमर्षामनुमन्यमानः सुतां त्वया नाम मु
निर्विमान्यः। मुष्टं प्रतिग्राहयिता स्वमर्थं पात्रीकृतो दस्युरिवासि येन। शारद्वतः। शार्ङ्गरव
विरम त्वमिदानीं। शकुंतले वक्तव्यमुक्तमस्माभिः। सोयमत्रभवानेवमाह। दीयतामस्मै
प्रत्ययप्रतिवचनं। शकुं। आत्मगतं। इमं अवत्थन्तरं गदे तारिसे अणुराए किं वा सुमरिदेण ४६
अत्ता दाणिं मे सोअणीओ त्ति ववसिदं। प्रकाशं। अज्जउत्त इत्यर्धोक्ते। संसइदे दाणिं एए

धर्मं प्रति विमुखता कृतावज्ञा। राजा। कुतोयमसंकल्पितः प्रश्नः। शार्ङ्ग। अन्यकार्थी मूर्च्छन्त्यमी वि
काराः प्रायेणैश्वर्यमत्तेषु। राजा। विशेषेणाधिक्षिप्तोस्मि। गौतमी। जादे मुहुत्तअं मा लज्ज। अवण
इस्सं दाव दे ओउण्ठणं। तदो तुमं भट्टा अहिजाणिस्सदि। यथोक्तं करोति। राजा। शकुन्तलां नि
र्वर्ण्य। आत्मगतं। इदमुपनतमेवं रूपमक्लिष्टकान्ति प्रथमपरिगृहीतं स्यान्न वेति व्यवस्यन्॥
भ्रमर इव विभाते कुन्दमन्तस्तुषारं न खलु सपदि भोक्तुं नैव शक्नोमि हातुं॥ विचारयन् स्थितः। प्रती
हारी। अहो धम्मावेक्खिदा भट्टिणो। ईदिसं णाम सुहोवणदं रूवं देक्खिअ को अण्णो विअ
रेदि। शार्ङ्ग। भो राजन् किमिदं जोषमास्यते। राजा। भोस्तपोधनाः चिन्तयन्नपि न खलु

चित्रचित्ति २

ग्रणागदं उदन्तं तवसख्ये सम्हि हिदं अत्थि । राजा । अपुमस्लावत । शाकुं तलकवणं । सो मेपुत्तके
दस्स दीहापंगोणाम मित्तयोदस्स उवद्धिदोत्तु एव्वस्सं दावपदमं पिस्सं उत्तिम्मणुस्सं यिणाउव
सं दिद्दो उदएण ए ऊए दें भूपरिस्सस्सादो हत्थ बद्धं मे उवगदो । पश्चा तास्सिं एवमएगहिदे
46 सलिलेणेण किदो पणअो तदा तुमं इम्स्स्ये पहासिदो । सेसत्थोसगंधे सुविस्सासि दिविविए दौस्ष्यंति =
त्थस्स आरणअो त्ति । राजा । एवमादिभिरात्मकार्यैर्निर्वर्तितैर्न नामनृतमयवाङ्मधुभिराकृ
ष्यन्ते विषयिणः । गौतमी । महाभाअ आगरुहसि एदं मं मंडिडु । तपोवनसंमवड्डिदो अणभिज्ञ
सो अण्णं जणो कइदवस्स । राजा । तापसवृद्धे । स्त्रीणामशिक्षितपटुत्वममानु ४०

कैतवस्य १

ससमुदाआरो।पोरवणकुत्तंणामदेतहपुराअस्समपदे सतावुत्ताणहिअअंइमंजणंसमअपुव्वंप
तारिअ·ईदिसेहिंअक्खरेहिंपच्चाचक्खिदुं।राजा।शान्तं।व्यपदेशमाविलयितुं।किमीहसे
जनमिमंचपातयितुं।कूलंकषेवसिंधुःप्रसन्नमंभस्तटतरुंच।शकुं।होदुजइपरमत्थदोपरपरि
ग्गहसंकिणातुएएवंपउत्तं·अहिण्णाणेणइमिणातुहआसंकंअवणइस्सं।राजा।उदारःकल्पः।
शकुं।मुद्दाठ्ठाणंपरामृश्य।हद्धी।र।अंगुलीअअसुण्णामेअंगुली।सविषादंगौतमीमवेक्षते·गौ।
णूणंदेसक्कावदारब्भंतरेसचीतित्थसलिलंवंदमाणाएपब्भट्ठंअंगुलीअअं।राजा।सस्मितं।
इदंतत्प्रत्युत्पन्नमतिस्त्रैणमितियदुच्यते·शकुं·एत्थदावविहिणादंसिदंपहुत्तणं।अवरंदेकहि
स्सं।राजा।श्रोतव्यमिदानींसंवृत्तं।शकुं।णंएक्कदिअहम्मिणोमालिआमंडवेणलिणीपत्तभा।

47

सपक्षएणमुहः मकुरगो द्दिसुद्धद्धि अविसमाहप्पंवासं उवगदो। पटान्तेन मुखमा
वृत्य रोदिति। शार्ङ्ग। इत्थमात्मकृतं प्रतिहतं चापलं दहति। अतः परीक्ष्य कर्तव्यं विशे २।२
षात्संगतं रहः। अज्ञातहृदयेष्वेवं वैरीभवति सैगतं। राजा। अपि भोः किं चलवती प्रत्यया
देवास्मान्संयुतदोषाक्षरेण क्षिणुथ। शार्ङ्ग। सासूयं। श्रुतं भवद्भिरधरोत्तरं। आजन्म
नः शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य। परातिसंधानमधीयते यैर्वि
द्येति ते संतु किलाप्तवाचः राजा। भोः सत्यवादिन्नभ्युपगतं तावदस्माभिरेवं॥ ४८
किं पुनरिमामतिसंधाय लभ्यते। शार्ङ्ग। विनिपातः। राजा। विनिपातः पौरवैः प्रार्थित

४८

षीपुरुषं तत्पते किमुतया: प्रतिबोधवत्य: । प्रागन्तरिक्षगमनात्स्वमपत्यजातमन्यद्विजै: पर
भृता: किलपोषयान्ति ॥ शार्ङ्ग० । सरोषं । अनार्ये स्वहृदयानुमानेन पश्यसि कोनाम
धर्मकंचुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते । राजा । आत्मगतं
संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते । तथाह्यनया ॥ ॥ मय्येवविस्म
रणदारुणचित्तवृत्तौ वृत्तं रहःप्रणयमप्रतिपद्यमाने ॥ भेदाद्भ्रुवोः कुटिलयोरतिलो
हिताक्ष्या भग्नं शरासनमिवातिरुषा स्मरस्य ॥ प्रकाशं । भद्रे प्रथितं दुष्यन्तस्य चरितं त
थापीदं न लक्ष्यते । शार्ङ्ग० । श्रुतं भवद्भिः पुरस्थमभिच्छंदचारिणी किं इत्थं । आत्महितं इदमस्य पुरुषं

अपिहस्ते। तिष्ठ साधयामो वयं। राजा। भोस्तपस्विन् किमत्रभवतीं विप्रलभसे। पद्य। कुमु
दान्येव शशांकः सविता बोधयति पंकजान्येव। वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखवी
वृत्तिः॥४१॥ शार्ङ्ग। यदा तु पूर्ववृत्तमन्यसंगात् विस्मृतो भवान् तदा कथमधर्मभीरुः। राजा। भ
48 वंतमेवात्र गुरुलाघवं पृच्छामि। मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये। दारत्यागी भ
वाम्यहो परस्त्रीस्पर्शपांसुलः। पुरोहितः। विचार्य यदि तावदेवं क्रियतां। राजा। अनुशा
स्तु मां भवान्। पुरोहि०। अत्रभवती तावदाप्रसवादस्मद्गृहे तिष्ठतु। राजा। कुत इदमुच्यत इति॥ ४२
पुरो०। त्वं साधुभिरादिष्टः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति। स चेन्मुनिदौहि

४८

इतिनश्रद्धेयमेतत्।शार्ङ्ग।किंतुत्तरोत्तरेण।अनुष्ठितोगुरोःसंदेशः।प्रतिनिवर्त्तामहेवयं
राजानंप्रति।तदेषाभवतःकान्तात्यजवैनींगृहाणवा।उपपन्नाहिदारेषुप्रभुतासर्वतोसुखी।
गौतमिगच्छाग्रतःप्रस्थिता।शकुं।अहंइमिणाकिदवेणविप्पलद्धह्मि।तुह्मेविमंपरिच्चअ
ह।अनुप्रतिष्ठते।गौतमी।स्थित्वा।वच्छसंगरवअणुगच्छदिइयंखुणोकरुणपरिदेविणी।स
उंद्धला।पच्चादेसपरुसेभत्तुणि।किंवामेपुत्तिआकरेदि।शार्ङ्ग।सक्रोधंसरोषं।किमिदंपुर
९२ पुरोभागेस्वातंत्र्यमवलंबसे।शकुं।भीतावेपते।शार्ङ्ग।शकुंतलेयदियथावदतिक्षितिपस्त
थात्वमसिकिंपितुरुत्कुलयात्वया।अथतुवेत्सिशुचिव्रतमात्मनःपतिकुलेतवदास्य

तिरोहितेति वा। सर्वे विस्मयं रूपयंति। राजा। भगवन्प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्टए
व। किं वृथा तर्केणान्विष्यते। विश्राम्यतु भगवान्। पुरोहितः। विलोक्य। विजयस्वेति निःक्रांतः।
49 राजा। वेत्रवति। पर्याकुलोस्मि। शयनभूमिमार्गमादेशय। प्रतीहा। इदो इदो देवो। प्रस्थि
ता। राजा। कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयां। बलवत्तु दूयमानं प्रत्यायय
तीव मे हृदयं॥ ॥ इति निःक्रांताः सर्वे पंचमोंकः॥ छ॥ ततः प्रविशति नागरिकश्यालः
पश्चाद्बद्धपुरुषमादाय रक्षिणौ। रक्षिणौ। ताडयित्वा। अले कुंभीलआ कहेहि। कहिं तु ५०
ए एसे मणिबंधुक्किण्णणामहेए लाअकीअए अंगुलीअए समासादिदे। पुरुषः। भी

५०

र्स्मल्लक्षणोपपन्नो भविष्यति।तदाभिनं[illegible] शुद्धान्तमेनां प्रवेशयिष्यसि।विपर्यये तु
पितुरस्याः समीपमवस्थितमेव।राजा।यर्थ गुरुभ्यो रोचते·पुरो·वत्से अनुगच्छ मां।शकुं॥भ
अवति वसुधे देहि मे विवरं।रुदती प्रस्थिता·निष्क्रान्ता सह पुरोधसा·तपस्विभिश्च।राजा
शापव्यवहितस्मृतिः शकुंतलागतमेवाचिंतयति।नेपथ्ये॥आश्चर्यं२ राजा।आकर्ण्य कि
नु खलु स्यात्।प्रविश्य पुरोहितः।सविस्मयं।देव अद्भुतं खलु संवृत्तं।राजा।किमिव।पु
रोहितः।देव परावृत्तेषु कण्वशिष्येषु।सा निंदंती स्वानि भाग्यानि बाला बाहूत्क्षेपं क्रंदि
तुं च प्रवृत्ता।राजा।किं च।पुरो।स्त्रीसंस्थानं चाप्सरस्तीर्थमारादुत्क्षिप्यैनां ज्योतिरेकं जगाम।

लग्नंतलेइंदलहत्थलामुलं अंगुलीअग्गंदोकियअयछ। हंगेसेविक्ष्अाञदंसअंतेगहिदेलावमिच्छोहिं।म
लेहवासुंचेहवा।अच्छंसेम्हाम्र मवुत्तो।ग्वाल:।जाणुकाविस्सगंधी।एवोगोहदेमहछंवंधो।एवंति
यसंसच्चंअंगुल।अदंसतीसेवीमरिसिदहं।ताएथलुउलंएछगव्वामो।रत्ति।णेलह।ग्यालःगछ
अलेगंडलेच्छ।अवंपरिकामंति।ग्यालः।सूत्रअइमंगोवरहुवालेअपमत्तापडिवालेह।जावइमं
अंगुली अंवंजहागमणंअहिलो।णिवेदिअतदोसासेणंपडिराविअणिक्कमामि।उलंजविसद्
अाभुत्तोसामिप्पसादत्थं।निःक्रांत:ग्पालः।प्रथमः।जाणुअफुल्लंतिमेहम्याइमस्सवह
स्ससुमणेपिणहुं।पुरुषं निर्हिंरंति।पुरुषः।णालुहदिलावेअकालणेमालगेनविहुं॥
द्वितीयः।विलोकं।एसेअम्हाणंसामीपत्तस्सेलाअम्भोसणंपडिच्छिअइहोमुहंहेवधीअदि।गिहुय
जाणुअंगिराअदिहुआउत्तो।द्वितीयः।णंअवसलोपसप्पणीआलाआणे।प्रथमः ४२

50

लिनाटितके ञ· पसीदंतभावमियोतहृगोणं दिमकम्मकाली। प्रथमः। किंखुमोहृगेवम्ह
णेत्तिकलिम्बरम्मापडिमाहृहिले· पुरुषः। मुपुथदा। छिंम्हृ मकौ वंदालखूतलवासी। धी
वले। द्वितीयः। पादम्बलकि म्रमहृहिंजादीपुविदे। शपालः। म्हवयकेहुएहेम्रणुघ्रमेण· मा
णोम्हंतरा। पडिहृधहृ उत्तोजं मबुततम्राणवादि· कहेहि· पुरुषः। अहकेजालुगालादीहिंमछ्छ वं
धणोवाए हिंकुडुंवभलणंकरोमि· शपालः। विहस्य। विसुद्दादाणिं विम्रजीवो· पुरुषः। महामाएवं
भण। सहजे किलजेविणिदिएणकुम्मेकम्मविवज्ञणीयकें पसुमलणकम्मदाकणेम्रणुकंपा
मिडएवमोत्तिए। शपालः। तदो २ पुरुषः। एक्कदिअमेरवंडमोलोहिम्रमहेमएकाप्पिदे· आवंतज्ज

सहजें के लयर विनिंदितें नखलुतव कर्मविनिदितें। पशुमाराणकर्मदारुणं अनुकंपामृदा वित्रयोनि ये २

२।२

कि। सूचकः। सोधिदं णाम अम्हेहिं। जानुकः। णं भणाहि। इमस्स किं एण मच्छमंसविक्कएण जत्तणो त्ति। पुरुषः मम्हे
यया पत्तपति। पुरुषः। भट्टके इदो अहं तुह्माणं सुमणोमूल्लं के हेउ। जानुकः। एतके जुज्जइ। रूप
लः। धीवरमहत्तरतुमं पिअवअस्सको दाणि मे संवुत्तो। कादंवरीसक्खिअं अम्हाणं पढमसोहि
दं इच्छीअदि। तास्तो डिआपणं एव्व गच्छामो इति निःक्रान्ताः सर्वे। नीयः प्रवेशकः। ततः प्रविशत्याका
शयानेन सानुमती नामाप्सरा। अप्सराः। णिव्वत्तिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसाणिज्झं
जाव साहुजणस्स अभिसेअकालो त्ति। ता जाव संपदं इमस्स राएसिणो उदन्तं पच्चक्खीकरिस्सं। मे
णआसंबंधेण सरीरभूदा दाणिं मे सउंदला। ताए अ दुहिदुणिमित्तं आदिट्ठपुव्वम्हि। समन्तादव
लोक्य। किंणुक्खु उदुच्छवे वि णिरुस्सवारंभं विअ राअउलं दीसइ। अत्थि मे विहवो पणिधा

लीलविक्कमिमुगो मुहं वाद किंसुस्स यि। प्रविश्य नृपालः। स्वचस्सम्मुंची ब्रह्म एसो जालो पजीवी
उववासो। किलन्तंगुली स्सम्पत्ता आसमी· सूचकः। जत्तस्सावुत्तोलसणादि। । द्वितीयः। एसो जमस्स
दत्तं पविसि स्सुपडिणिवुत्तो। पुरुषं परिमुक्त बधनं करोति· पुरुषः। नृपाल प्रणम्य· लद्दो ज्जहकी
लिसेम स्साजीवे· नृपालः। एसो लहि(।) गंधुरुली सम्मल्लं मिदो पमादो ह्रविदो। पुरुषाय्यार्थं
प्रयच्छति· पुरुषः। सप्रणामं परिगृह्य· लद्दके स्सपुणगहदम्हि। सूचकः। एदेणा मम्मपुणगहे·
ऊम्मूलादो स्सावदालि स्सहस्सिकं येपडिक्खदो। जानुकः। स्साउत्तपलितो संकडे हि। तेणा स्संगुली
स्सएण लाहिणो। संमहेणाहादंवं नृपालः। णंतस्सिमहाकहं रदाणं लाहिणो बहुमदं ति तक्केमि। तस्सा
दंसणोण लाहिणा को विस्सालिमहो जणो सुमरिदो दुक्कत्तं पकिदिगंभीरो विपडुस्सपुच्छमणोणा स्सा

मि।प्रथमा।जइ मम विखु अदं अच्चण फलस्सं। द्विती० अकाहिदे वि एदं संपज्जइ।जदो एदं एव्व णो जी विदं।दु
८२ ग्गाहिदं सरीरं।सखीमवलंब्य स्थिता।चूतांकुरं गृह्णाति। प्रथ्ये अपडिबुद्धो वि चूद पसवो एत्थ बंधण लंग
अंक ४ सुरही होदि।कपोतकं कृत्वा।णुंसिमए चूदंकुर दिण्णो कामस्स गहिद धणु अस्स। पहि अजण जुवइ लक्ख
पंचब्भहिओ।सरो होहि।इति चूतांकुरं हस्ता।क्षिपति। प्रविश्य पटाक्षेपेण कुपितः कंचुकी।मा ताव द
नो अनात्मज्ञे देवेन प्रतिषिद्धे वसंतोत्सवे अमाम्रकलिका भंगं किमारभसे।उभे० भीते० पसीद इज्जो। अगिह
दत्थावस्सं।कंचुकी।न किल श्रुतं युवाभ्यां।यद्वासन्तिकैस्तरुभिरपि देवस्य शासनं प्रमाणं।कृतं।त
दाश्रयिभिः पतत्रिभिश्च।तथा हि।चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः संनद्धं यदपि
स्थितं कुरुवकं तत्कोरकावस्थया।कंठेषु स्खलितं गते पि शिशिरे पुंस्कोकिलानां रुतं शंके संहर
२

णिमस्सवं परिआदु किं दुम्महो एआ दरोमए माणइदो। हेडु। इमाणं तेउआणया लिंआतं तिर
कवरिणीपडिछणाणं मम परिवाहिणी सविंआउवलं तिरिकी। णाडेनावतीर्यस्थिता। ततः प्र
विशति नूतं कुवरमबलो कवंती चेटी। अपराचप्परम्मा। प्रथमा। आसंबहरि अपं
डुर जीविदस्स ब सीव मसमायममहिं। तिको एस्सरूदु मंगलउमंपमादएमि। द्वितीया।
एकाकिनी परस्मिके परक्कतिए किं एआएणीमंतम्मि। प्रथमा। मङ्गहरिए एदूदकालि चूदे की चूउ म्मतिआपरद्दृदि आहो
दि। द्वितीया। सहर्षं वरयोपस्य। कहं उवहिस्सो मट्टमासो। प्रथमा। मङ्गआरी एतवदालिं कालो एस
मदविब्भमगीतालं। द्वितीया। सहि अवलं बमं जाव अग्गपादहि सुस्स विअ। कामदेवआणंकरे

पि

कथयितव्यं। यदैव खलु स्वांगुलीयकदर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा मया तत्र भवती रहसि
शकुंतला मोहात्प्रत्यादिष्टेति तदा प्रभृत्येव पश्चात्तापगतो देवः। तथाहि। रम्यं द्वेष्टि
83 यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते शय्याप्रांतविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा गोत्रेषु स्खलितस्तदा भवति च व्रीडा
विलक्षश्चिरं। सानुमती। प्रियम्मे। कंचु०। अस्मात्प्रभवतो वैमनस्यादुत्सवः प्रत्या
ख्यातः। उभे। उज्जइ। नेपथ्ये। एदु एदु भवं। कंचुकी। कर्णं दत्वा। अये इत एवाभिवर्तते दे
वः। स्वकर्मानुष्ठीयतां। उभे। तहइ निष्क्रांते। ततः प्रविशति पश्चात्तापसदृशवेषो राजा

तिष्ठमेरोपि चकितस्मरोगार्द्ध कष्टंवारी। उभे॰। सानुमती च। णाथिसंदेहोमहप्पहावो राएसी॰ प्रथमा॰।
अज्ज कतिदिअहाइं अम्हाणं मित्तावसुणारहि एणलहिणीपा अमूलं पेसिदाणं इयं पमदंणाचसं ८२
पालणकम्म यमप्पिदं। ता आसंतुचरा एत्थ सुदपुव्वो अम्हेहिं एत्तो वुत्तत्तो। कंचु॰ भवतु न पुन
रेवं प्रवर्तितव्यं। उभे॰। अज्ज को इहलं णोजइइ मिणाउ णेण खोदव्वं॰ कहेदु। अज्जो किंणिमित्तं
लहिणा वसंतूसवो पडिसिद्धो॰ सानुमती॰ उस्सवपिअ क्खुमणुस्सा गुरुणा कालणेणहोद
...कुंतलानिरा ...नै राज्ञोऽपवा ...८१ व्वं। कंचुकी॰ बहुलीभूतमेतत् किं न कथ्यते। किमत्र भवत्योः कर्णपथं नायातं शकुंतला
प्रत्यादेशकौलीनं। उभे॰। सुदं रट्ठिअमुहदो जाव अंगुलीअअदंसणं। कंचुकी॰ तेन ह्यल्पं

आधिना

वार्थ॰। लं। प्रिदो॰ ए॰ मोत्तस्सो विसउंदत्ता वाहिणा॰ ण॰ च्चाणेहं कहं। चे॰ कि। स्सिदं वो तविस्स

दिति। कंचु॰ उपगम्य॰ जयतु देवः। माहाराज प्रत्यवेक्षितः प्रमद वनस्य मदनः यथाका

राजा॰२ मम धाम्नांविनोदनस्थानानि महाराज ः। वेत्रवति मद्वचनादमात्य मार्यपिशुनं ब्रू

54 हि॰। चिरप्रबोधनानन्द सं लावितमस्या। चिरद्य धर्मासनमध्यास्तितुं। यत्सत्य वोढ तं

रकार पौर्यमार्येणतत्पत्र मारोप्पदीयतामिति। प्रतीहारी। जं देवो आणवेदित्ति निःक्रान्ता। राजा

वातायनत्वमपिस्थानेयोगमसून्यं कुरु। निःक्रान्तः कुंचुकी। विदू॰। किं दंसवदाणि माक

त्ते। सं पदं सिसिरातवहेत्तरमणीए इमस्सिं पमदवणुज्जाणे सेवज्जन्तो रमइस्सासि। राजा ५५

विदूषकः प्रतीहारी च। कंचुकी। राजानमवलोक्य· अहो सर्वास्ववस्थासु रमणीयत्वमाकृति
विशेषाणां। एवं सुतनु कोपि प्रियदर्शनो देवः। तथा हि। प्रत्यादिष्टविशेषमंड नविधिर्धीमद्य
कोशार्पितं बिभ्रत् कांचनमेकमेव वलयं श्वासापरक्ताधरः। चिन्ताजागरणप्रतान्तनय
न स्वैर्गुणैरात्मनः संस्कारोल्लिखितो महामणिरिव क्षीणोपि नालक्ष्यते। स्वानु· राजा
नं दृष्ट्वा· यारे खु पञ्चादेस विमाणिदावि· इमस्स। किंदेसउंदलं कित्तं दिति। राजा ध्यान नर
मेदं परिक्रम्य। प्रथमं सारंग ग्राह्या प्रियया प्रातिवेश्यमानमपि स्मृतं। अनुत्राय डुःखाये
दं हतहृदयं संप्रति विवृद्धं। स्वानुः। तं हृदि स्नाणि तव स्थित्ती एत्ता अ थेमाति। विदू·। अप

दय। विनोदनस्थानं तन्नमेव मार्गमादेशाय। विदू॰ इदो इदो भवं। उभौ परिक्रामतः। सानुमती
अनुगच्छति। विदू॰ एसो मणि। सिलापट्ट अस्स णाहो माहवीमंडवो उववारम्मणिज्जदाए॰
SS णिस्संसं ससं॰ साअदेण। विअ लोपडिच्छइ। तापविसिअ णिसीदइ भवं। उभौ प्र॰ वेशं रूपचो
पविष्टौ। सानुमती। लदासंसिदा देक्खिस्सं दाव सहीए पडिकिदं तदो से भत्तुणो बहुम
दं अणुराअं णिवेदइस्सं। तथा कृत्वा स्थिता। राजा। सखे सर्वमिदानीं स्मरामि शकुंतला तुष
याः प्रथमवृत्तांतं। कथितवानस्मि भवते च। स भवान् प्रत्यादेशवेलायां मत्समीपमुपाग ५६
तो नासीत्। पूर्वमपि न त्वया कदाचित् संकीर्तितं तत्रभवत्या नाम। कच्चिदहमिव विस्मृतवा

वयस्यरंब्रोपानिपातेनोनर्थाइति यदुच्यते तदव्यभिचारिवचः।कुतः।मुनिसुताप्रण
यस्मृतिरोधिना मम च मुक्तमिदं तमसा मनः।मनसिजेन सखे प्रहरिष्यता धनुषि चूत
शरश्च निवेशितः।विदू०।चिठ्ठ दाव इमिणा दंडकठ्ठेण कंदप्पवाहिं णासइस्सामि।इति
दंडकाष्ठमुद्यम्य चूतांकुरं पातयितुमिच्छति।राजा।स्मित्वा भवतु दृष्टं ब्रह्मवर्चसं।स
खे।क्वोपविष्टः प्रियायाः किंचिदनुकारिणीषु लतासु दृष्टिं विलोभयामि।विदू०।णं।आ
सन्नपरिआरिआ चडुरिआ भवदा संदिठ्ठा माहवीमंडवे इमं वेलं अतिवाहिस्सं।तहिं
च मे चित्तफलअगदं सहत्थलिहिदं तत्तहोदीए पडिकिदं आणेहि त्ति।राजा।ईदृशं हृ

दावेण अहं रमामि। विदू॰। भो अ यि मेत को केण तत्त होदी अ आअसचारिणीदे त्ति। राजा। क
पतिदेवतामन्यः परिमाष्टुं मुत्सहेत। मेनका किल सख्यास्ते जन्मप्रतिष्ठेति श्रुतवानस्मि। तत्स
हचारिणीभिः सखी ते हृतेति मे हृदयमाशंकते। स्तानु॰ सम्मोहो खु॰। विदू॰ अ णि जोण पडिवे
हो। विदू॰। जइ एवं अत्थि दाव खु॰ समाअमो कालेण तत्तहोदीए। राजा। कथमिव। विदू॰। ण खु मा
दा पिदरो भत्तुविओअदुःखिदं दुहिदरं देखिदुं पारेन्ति। राजा। वयस्य स्वप्नो नु माया नु मतिभ्र
मो नु क्लिष्टं नु तावत्फलमेव पुण्यैः।। असंनिवृत्त्यै तदतीतमेते मनोरथा नाम तटप्रपाताः।। विदू॰ ५०
मा एवं। णं अंगुलीअं एव णिदंसणं। अवस्सं भावी अचिंतणिज्जो समाअमो होदि त्ति। राजा। अंगुली
यं विलोक्य। अये इदं तावदसुलभस्थानभ्रंशि शोचनीयं। तव सुचरितमंगुलीय नूनं प्रतनु ममेव

56

...कुंतलाऽ
...नं अनाग
...नायर

न त्वमपि। विदू॰। ण विसुमरामि। किंतु सव्वं कहिअ अवसाणे उण तुए उत्तं परिहासविअप्पओ एसो वि॰
ण भूदत्थो त्ति। मए वि मिप्पिंडबुद्धिणा तह एव्व गहिदं। अहवा भविदव्वदा बलवदी।
सानुमती। एवं एदं। राजा। ध्यात्वा। सखे परित्रायस्व मां। विदू॰। भोः किं एदं अणुववण्णं क्खु ईदिसं तुइ
५४ कदा वि सप्पुरिसा सोअवत्तव्वा ण होन्ति। णं पवादे वि णिक्कंपा गिरीओ। राजा। वयस्य निराकरणविक्ल-
वायाः प्रियायाः समवस्थामनुस्मृत्य बलवदशरणोऽस्मि। सा हि। इतः प्रत्यादेशात्स्वजनमनुगंतुं
व्यवसिता मुहुः। तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे। पुनर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति मां। सानुमती। अम्महे ईदिसी सकज्जपरदा। इमस्स सं

57

तस्मिं परिक्लन्तं। विदू०। उज्जुअ। सानुम०। अनेण हिततवास्सिणी एस उंदन्ता एव्व थम्मसीकलो इम
स्स राए सिलोपरिणं एवं देहेसत्ति। अहवा इदिसो अणुराओ अवतिमाले पेक्खदि ता कहं विच्छ
एदो। राजा। उपालभ्ये तावदिदं मंगुलीयकं। विदू०। आत्मगतं। गहिदो लगं पं थाउमंतो
णं। राजा। कथं नु तं बन्धुरकोमलाङ्गुलिं करं विहाय सि निमग्नमसि। अथवा अचेतनं नाम गु मं८
णं न लक्खये। मयैव कस्मादवधीरिता प्रिया। विदू०। आत्मगतं। कहं बुभुक्खाए खादयितव्वो म्हि
राजा। अकारणपरित्यक्ते अनुशयतप्तहृदय स्तावदनुकम्प्यतामयं जनः पुनर्दर्शनेन। प्रविश्य ५८
पटाक्षेपेण चित्रफलकहस्ता चतुरिका। इअं चित्तगदा भट्टिणी त्ति चित्रफलकं दर्शयति। वि
दू०। साहु वअस्स मधुरावत्थाणदंसणीओ भावाणुप्पवेसो। खलदि विअ मे दिट्ठी णिण्णुण्णदेसु निम्नोन्नि

विलोक्यते फलेन । अकरुण न खु मनोहरा सुतस्याकृतमपि लखुपदं यदि ठुली श्रु । सानुमती । जइ स्सि हत्थ श० १
गदं न्वेसनं एव यो आणि ज्जेनये । विदू० । भो इश्रसा मम मा मुद्दो केणागुंम्बो देणतन्न होदी एहय ब्राकं या विदा ॥
सानु ॥ मम विको हहलेण आ अरिदो एसो । राजा । स्मृयतां । यदा स्वनगराय प्रस्थितं मां प्रिया स बाष्पमाह ।
पत्रिं ४ कियच्चिरेणार्यपुत्रः प्रतिपत्तिं दास्यतीति ॥ विदू० । तदो २ । राजा । पश्चादिमां मुद्रां तदंगुलौ नि नाम ४
वेशयता मया पि प्रत्यालिहिता । एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय गच्छति यावदंतं ॥
तावत्प्रिये मदवरोधगृहप्रवेशं नेता जनस्तव समीपमुपैष्यतीति । तच्च दारुणात्मना मया मो
हान्नानुष्ठितं । सानुमती । रमणीओ क्खु अवही विहिणा विसंवादिदो ॥ विदू० । कहं धीवलकप्पि
अस्स लोहिअमच्छस्स उदलब्भंतले आसि ॥ राजा ॥ शचीतीर्थं वंदमानायाः सख्याः ते गंगास्रो

ति०द्वि०

पुरुष्यते मलिनः। अश्रुच कपोलगलितं हृष्यमिदं वर्तिकोच्छ्रासात्। चतुरिके अर्धालिखितमेतद्विनो
दस्थानं तस्मात् गच्छ वर्तिकां तावदानय। चतुरिका। अज्ज माढव्व अवलंबितफलअं। जाव आअच्छामि। वर
राजा। अहमेवैतदवलंबे। यथोक्तं करोति। निःक्रान्ता चेटी। राजा। अहं हि। साक्षात्प्रियामुपगतामपहा
58 य पूर्वं चित्रार्पितां पुनरिमां बहुमन्यमानः। स्रोतोवहां पथि निकामजला मतीत्य जातः सखे प्रणयवा
न्मृगतृष्णिकायां। विदू०। आलगते। एसो अत्तभवं णदिं अदिक्कमिअ मिच्छदि त्ति एण्हि आए संगदो। प्रक
शं। भो अवरं किं एत्थ लिहिदव्वं। सानु। जो जो पदेसो सहीए मे आहिरूवो। तं तं आलिहिदुकामो भवे। रा
जा। श्रूयतां। कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी पादास्तामभितो निषण्णहरिणा ५९
गौरीगुरोः पावनाः। शाखालंबितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः शृंगे कृष्णमृगस्य वा

तै. १

प्पदेसे सुत्। भानु: अहो एसा राएसि लोलि धुणदा। जाणे सही अग्गदो मे वट्टदि। राजा। यत्साधन
विचेरस्य। क्रियते तत्तदन्यथा। तथापि तस्या लावण्यं परीक्ष्य। किंचेदन्विति॥ भानु: स
२३ रिसं एदं। पच्चावंवरुरुणा। धीमते हत्थ अग्गवल्लेव स्सम्मु। विदू: चोदा णि तित्ति तल्लेहादी
ओर्मं तिस्सवा चंद पणी आत्तो कहमा एयत तहोदी पडंदला। भानु: अणलिलो खुदु वस्स मोह
दिट्ठी अच्चंजोणे। राजा। वंतावत् कतमो तर्क पश्य। विदू: तक्केमि जाए सा पिडिलके सर्वे यणुब
तकुसुमेलके संतेण उक्ति णपेस्स विंडुणाव ओगेण विसे पदा ओसारि अहिं वाहहिं अव
सेवअसि तिङ तरुणपल्लवस्सा पु चपाअवस्स पासे इसि परिस्सता। विअ वारि लिहिदा एसा पदु
दत्ता। इदरा सहीओ। राजा. निपुणो विदग्धा न्। अस्सच मेस्लावणं ॥ क्वि वेजां उल्लिविनिवेज्ञो रेखा प्रां तो

मलता प्रिया ति थे किमत्र परिपतनखेदमनुभवासि। एषा कुसुमनिषण्णा तृषितापि सती भवंतमनु
रक्ता॥ प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति। सानु। अज्ज अभिजादं खु एसो वारिदो
विदू। पडिसिद्धा वि वामा एसा जादी॥ राजा॥ एवं भो न मे शासने तिष्ठसि। श्रूयतां तर्हि संप्रति॥
श्लो॥ अक्लिष्टबालतरुपल्लवलोभनीयं पीतं मया सदयमेव रतोत्सवेषु। बिंबाधरं स्पृशसि चेद्भ्रमर
59
प्रियायास्त्वां कारयामि कमलोदरबंधनस्थं॥ विदू॰ एवं तिक्खदंडस्स किं ण भाइस्सदि। प्रहस्यात्मग
तं॥ एसो दाव उम्मत्तो अहं वि एदस्स संगेण ईदिसवण्णो विअ संवुत्तो। प्रकाशं। भो चित्तं खु एदं। राजा॥
पचित्नार्णी कथं चित्रं। सानुमती॥ अहं वि दाणिं अवगदत्था किं उण जधा लिहिदाणुभावी एसो॥ राजा॥ वयस्य किमि
ार दमनुष्ठितं पौरोभाग्यं॥ ॥दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन॥ स्मृतिकारि ६०

दाषैकदकपुरी भागी म्यमाव॰६३ दे॰ ६:२

वामनयनं कंडूयमानां मृगीं॥ विदू॰ आत्मगतं। अह एत्थ देवेकवा मि पूरिदब्बंणो मा चित्तफलअं लंब कुच्चाणं तावस्साणं कदंबेहिं। राजा॰ वयस्य॰ अन्यच्च शकुंतलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः। विदू॰। किं विअ। सानु। वनवासस्या अस्याः सौकुमार्यस्य चाविरोधि अत्र यत्करणीयं तत्कथ्यतां विस्मृ दि। राजा॰ कृतं न कर्णार्पितबंधनं सखे शिरीषमागंडविलंबिकेसरं। न वा शरच्चंद्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनांतरे। विदू॰। भो किंणु तत्तहोदी रत्तकमलपल्लवसोहिणा अग्गहत्थेण मुहं ओवारिअ चइदचइदा विअ ट्ठिदा। राजा। सावधानं निरूप्य दृष्ट्वा। विदू॰। आः एसो दासीए पुत्तो कुसुमरसपाडच्चरो तत्तहोदीए वअणं अहिलंघदि महुअरो। राजा। ननु वार्यतामेष ३२
धृष्टः। विदू॰ भवं एव अविणीदाणं सासिदा इमस्स वारणे पहविस्सदि। राजा। युज्यते। अयि कुसु

तदो मं मेहपडिच्छंदे प्पासादे मह्दा वेदिं त्ति दुतपदं निःक्रांता ।। सानु · अमप्पकं तहि अस्से । विपद
मस्से लावणं अवेक्खदि अथो दिल्लोहो होदो णिं एको । प्रविश्य पत्रहस्ता प्रतीहारी ।। जेदु २ देवो ।।
राजा । वेत्रवति नरवलोकित रावायाहछो देवी प्रतीहा · अहइं । पत्तहत्थं मं देअ किल अपडि णिउत्ता । राजा
60 कार्यज्ञा कार्योपरोधं मे परिहरति · प्रतीहा · देव अमच्चो विम्मवेदि । अत्थजादस्स गणणा बहुल
दाए एकं एव्व पोरकं अवेक्खिदं ति देवो पत्तरूढं पच्चक्खी करेदु त्ति । राजा । इतः पत्रिकां दर्शय ।।
प्रतीहारी उपनयति · राजा · अनुवाच्य । कथं समुद्दव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यस ६१
ने विपन्नः । अनपत्यश्चा किल तपस्वी राजगामी तस्यार्थ संचय इत्येतदमात्येन लिखितं । कष्टं खल्व
नपत्यता वैचवति रक्षुं धन वात् बहुप नीकेनतव सवता भवितव्यं । विचीयतां यदि काचिदापन्न

आर्व्वेष्यती ।

णा वयामे पुनरपि चि ऽीकृताकांता। बाष्पं विहरति। मनु॥ उग्रा पर विरोहो अपुत्रो एसो विरहमग्गो॥ रा

प ऊा। वैस्य कथमेवम विज्ञाप्य दुःखमनुभवामि। पृतागरा न खिलीभूतस्तस्याः स्वप्ने समागमः॥

बाष्पस्तु नदृदा त्येनां दुहवि चगता मपि। स्तानु म। सबहापमांद्धिदेनु एप थ्रादेस्र डुः खेस उदलाए

प्रविश्य चतुरिका। जेदु लहा। वि हिम्राकरेउ सुंगे दिह सुइदामुपस्पिदामि। राजा। किं वा चतुरिका। सोमे २८

स्य दे अंतरातराल अदुती स्राए देइ एव खु मदीए सुहं एव चउ उत्तस्स उवणइस्स ति स वलक्का

रेण हिदो। विदू। दिहि आत्तमं सुहा। चउरे। जावदेवी एवि उवलग्गा उत्तरी अंतराल अमोचेदि ताव म

एणि बाहिदे सुत्तो। राजा। वयस्य उपास्य तादे वी बहुमान गहिंता च॥ भवानिमं प्रतिदातिरक्खउ

विदू। अत्ताणं तिल्लणाहि। चित्त पाल कमादाये पायच। उदन्मवे चेते उलकाल कृदा दामु ची स्रा

संरोपितेप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुल प्रतिष्ठा। कल्पिष्यमाणा महते फलाय वसुंधरा
कालइवोप्तबीजा। सानु॰ अपरिछिण्णदाणिं दे संतदी भविस्सदि। चतुरिका। जनांतिकं अए इमि
णा सत्थवाहवुत्तंतेण विउणुव्वेओ भट्टा। णं अस्सासिदुं मेहपडिछंदादो अज्जं माढव्वं गेण्हिअ
आअछ्छ। प्रती॰ सुट्ठु भणासि। इति निःक्रांता॥ राजा। अहह दुःषंतस्य संशयमारूढाः पिंडभा
62 जः। कुतः। अस्मात् परं वत यथाश्रुति संभृतानि कोनः कुले निवपनानि नियच्छतीति। नूनं
प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबंतीति। मोहमुपगतः। चतुरिका॥ स ६२
संभ्रममवलोक्य। समस्ससदु। २। सानुमती। हद्धी२ सदि खु दीवे ववधाणदोसेण एसो अंधआर
दोसं अणुहोदि अहं दाणिं एव्व णिव्वुदं करेमि। अहवा। सुदं मए सउंदलं समस्सासअंतीए म

सन्ततिरस्यापत्यमस्यान्। प्रतीहा. देव दाणिं एव्व साएतअस्स सेट्ठिणो दुहिदा णिव्वुत्तपुंस
वणा जाआ से सुणीअदि। राजा। ननु गर्भः पित्र्यं रिक्थमर्हति। गच्छ एवममात्यं ब्रूहि। प्रती. जं देवो आ
णवेदि (इति प्रस्थिता)। राजा। एहि तावत्। प्रती. इयम्हि। राजा। किमनेन सन्ततिरस्ति नास्तीति। येन ये
न वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना॥ स स पापादृते तासां दुष्यन्त इति घुष्यताम्। प्रती. एवं णाम घोसइदव्वं
(निष्क्रम्य पुनः प्रविश्य) काले पवुट्ठं विअ अहिणन्दिदं देवस्स सासणं। राजा। (दीर्घमुष्णं च निश्व
स्य) एवं भोः सन्ततिच्छेदनिरवलम्बानां कुलानां मूलपुरुषावसाने संपदः परमुपतिष्ठन्ति। म
माप्यन्ते पुरुवंशश्रीरकालइव्वोप्तबीजा इव धरित्री॥ प्रतीहा. पडिहदं अमंगलं। राजा। धिङ्मामु
पस्थितश्रेयोवमानिनं॥ सानु. असंसअं सहिं एव्व हिअए करिअ णिन्दिदो णेण अप्पा। राजा॥

कपंजमेष्पाम्‌ थ्ये॰ पुनस्तदेव पठित्वा। कहं लंबाइस्सं। एस मं को वि पच्छावगाद सिरोहरं इक्खु विअ त्तिसंगं करे
दि। राजा। हस्तावापमादिते स्तरगरं शरासनं ह्रस्ते। नेपथ्ये। एष त्वामभिनवकंठशोणितार्थी। शार
दूलः पशुमिव हन्मि चेष्टमानं। आर्तानां भयमपनेतुमात्तधन्वा दुष्यन्तस्तव शरणं भवत्विदानीं॥
62 राजा। सरोषं। कथं मामेवोद्दिशति। तिष्ठ कुणपाशन त्वमिदानीं न भविष्यसि। शार्ङ्गमारोप्य। वेत्रव
ति सोपानमार्गमादेशय। प्रती०। इदो इदो देवो। सर्वे सत्वरमुपसर्पंति। राजा। समन्तादवलोक्य। शून्यं
रवेदाच खल्विदं। नेपथ्ये। अविदा अविदा। अहं अत्तभवंतं पेक्खामि। तुमं मं ण पेक्खसि। बिडालगहिदो मूसओ
विअ णिरासो म्हि जीविदे संवुत्तो। राजा। भोस्तिरस्कारिणीगर्वित मदीयैः शस्त्रैस्त्वां द्रक्ष्यति। एष त ६२
मिषुं संदधे॥ ॥ यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजं। हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः
शस्त्रं संधत्ते। ततः प्रविशति विदूषकमुत्सृज्य मातलिः। मात०। कृताः शरव्या हरिणा तवासुराः

अ१ हिं इजणणी एसु हा दो जेण णाऊ सुआदे वा ए वणु चिंठंति। जह अइरेण धम्मपदिंणी अहिणि दइस्स
दिट्ठि। ताण उत्तंकालं पडिपालेडुं। जाव इमिणा वुत्तंतेण पिअ सहिं समस्सासेमि। उ
ह्वात्तकेण निःक्रान्ता। नेपथ्ये। अवहलणं २ राजा। कर्णं दत्वा। अये मा दव्य स्पवातस्व
र३। कः को चलेः। प्रविश्य परमेव्वा हा प्रतीहारी। परित्ता अडु देवो मं मच अगदं बक्कसं।।रा
जा। केनो त्तगंध्ये माणवकः। प्रती। अदिट्ठ रुवेण केण वि सत्तेण आदिक्क मिअ मेहपडिछंद अस्सयाप्साद
स्स अग्गल्लमिं आरोविदो। राजा। उत्थाय। मा ताबत् ममापि सत्वै रभि भूयंते गृहा। अथवा। अहन्य
स्वे२१ हन्यात्मन एव तावत् ज्ञातुं प्रमाद स्खलितं न शक्यं। प्रजा सु कः केन पथा प्रयातीत्य शेषतो वे दितु
मस्ति शक्तिः। नेपथ्ये। भो स अस्स अविहा २ राजा। गतिभेदेन परिक्रामन्। स खेनसेरवी २ नेप

हि मन्नीहोऽस्मात्प्रति पद्यते हि जनः। राजा। अनंतिकं। वयस्य अनतिक्रमणीया हि दिवस्पतेराज्ञा। तदत्र परिगतार्थं
कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि। त्वन्मतिः केवला तावत् परिपालयतु प्रजाः। अधिज्यमिदमन्यस्मिन्
कर्मणि व्यापृतं धनुः इति। विदू। जं भवं आणवेदि त्ति निःक्रांतः। मातलिः इतः इतः आयुष्मन्। राजा तथा रथारो
हणं नाटयति॥ ॥इति निःक्रान्ताः सर्वे षष्ठोंकः॥ ॥ततः प्रविशति आकाशयानेन रथारूढो राजा॥ अ ४
63 मातलिश्च। राजा। मातले अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये। मात
लिः सस्मितं। आयुष्मन् उभयमप्यपरितोषं प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते वान् गणयत्य
वदानविस्मितो भवतः सोऽपि न सत्क्रियागुणान्॥ मातले मा मैवं। खलु मनोरथानामप्यतिभूमिर्विस ६८
र्जनावसरसत्कारः मम हि दिवौकसां समक्षमर्द्धासनोपविष्टस्य॥ ॥अंतर्गतप्रार्थनमंतिकस्थं जय
न्तमुद्वीक्ष्य कृतस्मितेन। आमृष्टवक्षोहरिचंदनांकाम् दारमाला हरिणा पिनद्धा॥ ॥मातलिः। किमिव नाम

नारायनंतेषु विकल्प्यता मिदं प्रभावात्सौम्या निपततं सुहृद्ङने पतीतिचरंबिनदारुणः शराः। राजा। शस्त्र
मुपसंहरन्। अयेमातलिः। स्वागतमहेंद्र सारथये। प्रविश्यपविदूषकः। अहंजेण इहिपसुमारंमारिदोसो
इमिणा साअदेण अलिंगदीअदि। मातलिः। सस्मितं। आयुष्मन् श्रूयतां। यदस्मि हरिणा सकाशं
प्रेषितः। राजा। अवहितोस्मि। मातलिः। अस्ति कालनेमिप्रसूतिर्दुर्जयो नामदानवगणः। राजा। अस्ति श्रुत
नप पूर्वोमयानारदात्। मातलिः। सख्युस्तेस किलशतक्रतोरजय्यस्तस्य त्वं रणशिरसि स्मृतो निहंता। उच्छेत्तुं
तिध प्रभवतियन्न सप्तसप्तिस्तन्नैशं तिमिरमपाकरोतिचंद्रः। स भवानात्तशस्त्र एवइदानीं तमैंद्रं रथमारुह्य वि वा४
जयायप्रतिष्ठतां। राजा। अनुगृहीतोहमनया मघवतः संभावनया। अथमाढव्यं प्रति त्वं वा ताकिमेवं प्रयुक्तं
मातलिः। तदपिकथ्यते। किंचि निमित्तादपिमनः संतापादायुष्मान् मयाविक्लवो दृष्टः। पश्चात्कोपयि
तुमायुष्मंतं तथाकृतवानस्मि। कुतः। ज्वलति चलितेंधनोग्निर्विप्रकृतः पन्नगः फणां कुरुते। प्रायः स्वं म

मनिस्तमस्कं वायोरिमंपरिवहस्यवदंतिमार्गं॥ ॥राजा॥ मातलेऽतःखलुसबाह्यांतःकरणोममांतरात्मा
प्रसीदति। रथांगंविलोक्य। मेघपदवीमवतीर्णौस्वः॥ मातलिः॥ कथमवगम्यते॥ राजा॥ अयम रविवरेभ्य
श्चातकैर्निःपतद्भिर्हरिभिरचिरभासांतेजसाचानुलिप्तैः। गतमुपरिघनानांवारिगर्भोदराणां। पिशु
64 नयतिरथस्तेसीकरक्लिन्ननेमिः॥ मातलिः॥ क्षणादायुष्मान्स्वाधिकारभूमौवर्तिष्यते॥ राजा॥ अधोव
लोक्य। मातलेवेगावतरणादाश्चर्यदर्शनःसंलक्ष्यतेमनुष्यलोकः। तथाहि॥ शैलानामवरोहतीवशि
खरादुन्मज्जतांमेदिनीपर्णाभ्यंतरलीनतांविजहतिस्कंधोदयात्पादपाः॥ संतानैस्तनुभावनष्टस
लिलाव्यक्तिंभजंत्यापगाःकेनाप्युत्क्षिपतेवपश्यभुवनंमत्पार्श्वमानीयते॥ मातलिः॥ साधुदृष्टं॥ सब
हुमानंविलोक्य। अहोउदाररमणीयापृथिवी॥ राजा॥ मातलेकतमोयंपूर्वापरसमुद्रावगाढःकनकर ६४
सनिःस्यन्दीसान्ध्यइवमेघपरिघःसानुमानालोक्यते॥ मातलिः॥ आयुष्मन्नेषखलुहेमकूटोनामकिं किंपुरुषस्यवं ३स्यपर्वतः१

युष्मानमेव स्वरान्नार्हतीति पश्य। सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकंटकं। तव शरैरधुनानतपर्व
भिः पुरुषकेसरिणश्च पुरा नखैः। राजा। अत्र खलु शतक्रतोरेव महिमा स्तुत्यः। सिध्यंति कर्मसु
महत्स्वपि यन्नियोज्याः संभावनागुणमवेहि तमीश्वराणां। किं वाऽभविष्यदरुणस्तमसां विभेत्ता तं चेत्स
हस्रकिरणो धुरि नाकरिष्यत्। मातलिः। सदृशमेवैतत्। स्तोकमंतरमतीत्य आयुष्मन्नितः पश्य
नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः। विच्छित्तिशेषैः सुरसुंदरीणां वर्णैरमी कल्पलतांशु
केषु। संचिंत्य गीतक्षममर्थजातं दिवौकसस्त्वच्चरितं लिखंति। राजा। मातले असुरसंप्रहारोत्सु
केन पूर्वेद्युर्दिवमधिरोहता नालक्षितः स्वर्गमार्गः। कतरस्मिन्मरुतां पथि वर्तामहे। मातलिः।।
त्रिस्रोतसं वहति यो गगनप्रतिष्ठां ज्योतींषि वर्तयति च प्रविभक्तरश्मिः। तस्य द्वितीयहरिविक्र

अवतीर्य॰ मातले॰ भवान्कथमिदानीं। मात॰ संयमितो मया रथः। वयमप्यवतरामः। तथा कृत्वा॰ इत आ
युष्मन्॰ परिक्रम्य दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः। राजा। ननु विस्मयादवलोकयामि।
प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।
६२ ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्य
न्त्यमी। मात॰ उत्सर्पिणी खलु महतां प्रार्थना॰ परिक्रम्याकाशे॰ अये वृद्धशाकल्य किमनुतिष्ठति भ
गवान्मारीचः। किं ब्रवीषि। दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथ
यतीति॰ राजा॰ कर्णं दत्त्वा॰ अये प्रतिपाल्योऽवसरः खलु। मात॰ राजानमवलोक्य॰ अस्मिन्नशोकवृ ६६
क्षमूलतले तावदास्तामायुष्मान्। यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामीति॰ राजा॥ ॥
अवकाश१

२३

पुरुषपर्वतस्तपसां सिद्धिक्षेत्रं । पश्य । स्वायंभुवान्मरीचेर्यः प्रबभूव प्रजापतिः सुरासुरगुरुः सोऽस्मिन्सप
त्नीकस्तपस्यति । राजा । तेन हि अनतिक्रमणीयानि श्रेयांसि । प्रदक्षिणीकृत्य भगवंतं गंतुमिच्छामि । मातलिः
प्रथमः कल्पः । नाट्येनावतीर्णौ । राजा । सविस्मयम् उपोढशब्दा न रथांगनेमयः प्रवर्त्तमानं न च दृश्यते रजः
अभूतलस्पर्शतया निरुद्धतस्तवावतीर्णोपि रथो न लक्ष्यते । मात॰ एतावानेव शतक्रतोरायुष्मत
श्च विशेषः । राजा॰ मातले कतरस्मिन्प्रदेशे मारीचाश्रमः । मात॰ हस्तेन दर्शयन् पश्य ॥ वल्मीकार्ध
निमग्नमूर्त्तिरुरसा संदष्टसर्पत्वचा कंठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः । अंसव्यापि शकुंतनीड
निचितं बिभ्रज्जटामंडलं यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिंबं स्थितः ॥ ॥ राजा॰ नमोऽस्मै कष्टतपसे ।
मात॰ संयतप्रग्रहं कृत्वा । महाराज एतावदितिपरिवर्द्धितमंदारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः । राजा ॥
स्वर्गादधिकतरं निर्वृतिस्थानम् अमृतह्रदमिवावगाढोऽस्मि । मात॰ रथं स्थापयित्वा । अवतरत्वायुष्मान् । राजा

66

बालेस्मि मैत्स्यमइव पुत्रेस्मि ह्यतिमेमनः नूनमनपत्यतामेव चमलयाति। द्वितीया। एसा कुके सरिणी
उमेलेहेदि। जइसे पुत्तस्स नण मुञ्चोसि। बाल ः सास्मितं। अम्हे बालिन्धे खुल्लादोसि। अधरं दस्तयति। रा
जा। महत्तम। असौ वीजं बालोयं प्रतिभातिमे। स्फुलिंगावस्थया वह्निरेधमपेक्षइव स्थित ः। प्रथमा।
वच्छएइं बाल मिइं दंसंमुन्य वराइं देक्खिलणचुंदावइस्सं। बालः कहिंदे हिणं। हस्तं प्रसारयति। राजा।
कथं चक्रवर्तिलक्षणमप्यनेनधार्यते। तथा ह्यस्य प्रलोभ्य वस्तु प्रणयप्रसारितो विभाति जालग्रथि
तांगुलिः करः। ग्राललक्ष्यपत्रांतरभिन्न राग्रयानवोषसालिन्नमिवैकपंकजं। द्वितीया। सुव्वदे ण सक्को
एसोवाआमेत्तएण विरमाइडुं गच्छ मम केरए उडजे मक्कंडेअस्स इसिकुमारअस्स वण्णचित्तिदो मि
त्तिआमोरओ चिट्ठदि तं से उवहर। प्रथमा। तह इति निःक्रान्ता। बालः इमिणा एव दावकीलिस्सं।
तापसीं विलोक्य हसति। राजा। स्पृहयामि दुर्ललिताय स्मै। ग्रालक्ष्यदंतमुकुलानानिमित्तहासैरव्यक्त

यथा भवान् मन्यते · निष्क्रान्तः । मातलिः । आयुष्मन् साधयाम्यहं । निष्क्रान्तः । राजा । निमित्तं सूचयि
त्वा । मनोरथाय नाशंसे किं बाहो स्पंदसे वृथा । पूर्वावधीरितं श्रेयो दुःखं हि परिवर्त्तते । नेपथ्ये । मा खु २
चापलं करेहि · कहिं गदो अप्पणो पकिदिं । राजा । कर्णं दत्वा अभूमिरियम विनयस्य · को नु
खल्वेष निषिध्यते · शब्दानुसारेणावलोक्य सविस्मयं अये को नु खल्वयमनुबध्यमान
स्तपस्विनीभ्यामबालसत्वो बालः । अर्द्धपीतस्तनं मातुरामर्द क्लिष्टकेसरं । प्रक्रीडितुं सिंहशिशुं
बलात्कारेण कर्षति । ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां बालः । बालः । जृंभस्स सी
ह दंताइं दे गणइस्सं । प्रथमा · अविणीद किं णो अपच्चणिव्विसेसाणि सत्ताणि विप्पआरेसि · हं
त वड्ढइ दे संरंभो ठाणे खु इसिजणेण सव्वदमणो त्ति किदणामहेओ सि · राजा · किन्नु खलु ·

उभौ निर्वर्ण्य। अहो रे अ२ राजा। आर्ये किमिव। ताप॰ इमस्स बालअस्स तव य संबंधवादिणी आकिदित्ति
विम्हाविदम्हि। अपरिइदस्स वि दे अप्पडिलोमो संवुत्तोत्ति। राजा। बालमुपलालयन्। न चेन्मुनि
कुमारोऽयमथ कोऽस्य व्यपदेशः। ताप॰ पुरुवंशो। राजा। आत्मगतं। कथमेकान्वयो मम। अ॰ तःख
67 लुमदनुकारिणमेनमत्रभवती मन्यते अस्त्येतत् पौरवाणामंत्यं कुलव्रतं। भवनेषु रसाधिकेषु
पूर्वं क्षितिरक्षार्थमुशंति ये निवासं। नियतैकयतिव्रतानि पश्चात्तरुमूलानि गृहीभवंति तेषां।
प्रकाशं। न पुनरात्मगत्या मानुषाणामेष विषयः। ताप॰ जह भद्दमुहो भणादि। अच्छरासं
बंधेण इमस्स बालअस्स जणणी एत्थ देवगुरुणो तवोवणे पसूदा॥ राजा। आत्मगतं॥ हंत द्विती ६८
यमिदमाशाजननं। प्रकाशं। सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी॥ ताप॰ को तस्स

वर्णैरमणीयवचःप्रवृत्तीन् । अंकाश्रयप्रणयिनस्तनयान्वहंतो धन्यास्तदंगरजसा मलिनीभवंति । तापसी ।
होदु णमं अअंगणेदि । पार्श्वमवलोक्य । को एत्थ इसिकुमाराणं । राजा नमवलोक्य । भद्दमुह
एहि दाव मोएहि इमिणा डुम्भो अहत्थगाहेण डिम्भलीलाए वाहीअमाणं बालमिन्दं इन्दे । राजा ।
उप गम्य सस्मितं । अयेभो महर्षिपुत्र । एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया ।
सत्वसंश्रयसुखो । पिदूष्यते कलभस्य विष्णुनेव चंदनः । ताप० भद्दमुह णहु इसिकुमारओ ॥
राजा । आकारसदृशं चेष्टितमेवास्य कथयति । स्थान प्रत्ययात्तु वयमेवं तर्किणः । तथा ऽपि
तमनुतिष्ठन् । बालस्पर्शमुपलभ्य आत्मगतं । अनेन कस्यापि कुलांकुरेण स्पृष्टस्य गात्रेषु
सुखं ममैवं । कां निर्वृतिं चेतसि तस्य कुर्याद्यस्यायमंगात् कृतिनः प्ररूढः । तापसी ॥

दृ॰ओं च लक्ष्या
हैणवध्यमानं

यडुरो नि हित हस्तो परस्परमवलोकयतः। राजा। किमर्थं प्रतिषिद्धाः स्म। प्रथमा। सुणादु भट्टा। एसो·
एसा अवराजिदाणाम ओसही इमस्स जादकम्मसमये भअवदा मारीएण दिण्णा। एदं किल मा
दापिदरो अप्पाणं च वज्जिअ अवरो भूमिपडिदं ण गेण्हदि· राजा· अथ गृह्णाति। प्रथमा। तदो तं
सप्पो भविअ डंसइ। राजा। भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया। उभे। अणेअसो·
68 राजा। सहर्षं आत्मगतं· कथमिमं पूर्णमपि मम मनोरथं नाभिनंदामि· बालं परिष्वज्य ते ॥
द्वितीया· सुव्वदे एहि इमं वुत्तंतं णिअमवावुदाए सउंदलाए णिवेदेम्ह। इति निःक्रांते· बालः।
मुंच मं जाव अज्जुएस्स आसं गच्छामि। राजा। पुत्रक मया सहैव मातरमभिनंदयिष्यसि। बालः। मम
मम खु तादो दुस्संतो ण तुमं। राजा। सास्मितं एष विवाद एव प्रत्याययति· ततः प्रविशत्ये ६९
कवेणीधरा शकुंतला। २। विआरकाले वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ

धम्मदारपरिग्गाहिणो णामसंकित्तिदुं चिंतइस्सदि· राजा· स्वगतं· इयं खलु कथा मामेव लक्षीकरो
ति। यदि तावदस्य शिशोर्मातरं पृच्छामि· अथवानार्यः परदारव्यवहारः। प्र
विश्य· मृन्मयूरहस्ता तापसी· २ सव्वदमण सउंदलावण्णं पेक्ख। बालः सदृष्टिक्षेपं। कहिं
३४ वा मे अज्जू। उभे· णामसारिस्सेण वंचिदो माउवच्छलो· द्वितीया। वच्छ इमस्स मित्तिआमोरस्स रमणीअ
त्तणं देक्ख त्ति भणिदोसि· राजा। आत्मगतं· किं वा शकुंतलेत्यस्य मातुराख्या। संति पुनर्नामधेय
सादृश्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो विषादाय मे कल्पते· बालः
अज्जुए रोअदि मे एसो भद्दमोरओ। क्रीडनीयकमादत्ते· प्रथमा· विलोक्य सोद्वेगं अ
म्हहे· रक्खाकरंडअं मणिबंधे ण दीसइ राजा। अलमावेगेन। नन्विदमस्य सिंहशावविम
र्दात् परिभ्रष्टं आदातुमिच्छति। उभे· मा खु २ इदं खु अवलंबिदं। आः कहं गहिदं तेण· विस्म

करंडो मधुकोशे स्पर्द्धी टिका खड्गकोशयोरिति अजयः २

कंपि हम्मि देवेण। अज्जउत्तो क्खु एसो। राजा। प्रिये स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि सुमु
खि। उपरागान्ते शशिनः समुपगता रोहिणी योगं॥ शकुं। जेदु जेदु अज्जउत्तो इत्यर्धोक्ते बाष्पकंठी
विरमति। राजा। सुंदरि। बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया। यत्ते दृष्टमसंस्कारपाटलोष्ठपु
टं मुखं॥ बालः। अज्जू एको एसो। शकुं। वच्छ भागधेयाइं पुच्छ। राजा। शकुंतलायाः पादयोः प्रणि
63 पत्य। सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते किमपि मनसः संमोहो मे तदा बलवानभू
त्। प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः स्रजमपि शिरस्यंधः क्षिप्तां धुनोत्यहिशंकया॥
शकुं। उट्ठेदु अज्जउत्तो णूणं मे सुचरिदप्पडिबंधअं पुराकिदं तेसु दिअसेसु परिणा ७०
ममुहं आसि जेण सानुक्कोसो वि अज्जउत्तो मइ विरसो संवुत्तो। राजा। उत्तिष्ठति॥

ण्णमे अत्ताणअं अणित्त णो ण अच्चयेण खु। अहवा जहा तावदीए अचा किदं तह संवादी अरहदि एदं। राजा। (शकुन्तलां विलोक्य।) अये सेयमत्र भवती शकुन्तला यैषा। वसने परिधू
सरे वसाना नियमक्षाममुखी धृतैकवेणिः। अतिनिष्करुणस्य शुद्धशीला मम दीर्घं
विरहव्रतं बिभर्ति। शकुन्तला। पश्चात्तापविवर्णं राजानं दृष्ट्वा। ण खु अज्जउत्तो विय
तदो को एसो दाणिं किदरक्खामंगलं दारअं मे गत्तसंसग्गेण दूसेदि। बालः।
मातरमुपेत्य। अज्जुए एसो को वि पुरिसो मं पुत्ते त्ति आलिंगदि। राजा। प्रिये क्रौर्यमपि मे च यि प्रयुक्तं अनुकूलपरिणामं संवृत्तं। यदहमिदानीं त्वया प्रत्यभिज्ञातमा
त्मानं पश्यामि। शकुन्तला। आत्मगतं। हिअअ अस्सस २ परिच्चत्तमच्छरेण अणु

क्रिपेर भगवंतं दट्ठुमिच्छामि । राजा । हिरिआमि अज्जु उ रोहेण महउच्छव ।। वेगंतु । राजा । अयिरआचरितव्यम
सुदयकोलसु । एसोते । सर्वपरिक्रामंति ।। ततः प्रविशत्यदित्या सह मासनस्थो मारीचः ।। राजा
नमवलोक्य । दाक्षायिणि । पुत्रस्य ते रणे शिरस्य यम ग्रयायी दुष्यन्त इत्यभिहितो भुवनस्य भर्ता ।
70 चापेन यस्य विनिवर्तित कर्मजातं तत्कोटिमत् कुलिशमाभरणं मघोनः । अदितिः । संभाविण
वांप अ । पुत्तो से आकिदी । मात । अयुष्मान् । एतौ पुत्रप्रीति पिशुनेन चक्षुषा दिवौकसां पितरावा
युष्मन्तमवलोकयतः । तावुपसर्प । राजा । मातले । एतौ । अहुर्द्वादशधा स्थितस्य मुनय
स्तत्तेजसः कारणं भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरं । यस्मिन्नात्मभवः परो
पुरुष श्चक्रे भवायास्पदं द्वंद्वं दक्षमरीचिसंभवमिदं तत्स्रष्टुरेकान्तरं । मात । अथ किं । ७१
राजा । उपगम्य । उभाभ्यामपि वासव नियोज्यो दुष्यन्तः प्रणमति । मारीचः । वत्स चिरं पृथिवीं पालय ।।

सेवा-७

शाकुं। स्वहस्तं अज्ज उत्तरेण स्तुमरिदोहकवलाइ अञ्चंञ्जलो· राजा· उद्भूतविषादश्चात्यः कथयिष्या
मि॥ मोहान्मयासुतनु पूर्वमुपेक्षितस्ते यो बद्धो विहरधरे परिबाधमानः। तं तावदाकुटिलपक्ष्म
विलग्नमद्य बाष्पं प्रमृज्य विगतानुशयो भवेयम्। यथोक्त मनुतिष्ठति· शाकुं। नाममुद्दाहं पू
अज्ज उत्तरं देदे अंगुली अन्नं। राजा अस्मादंगुलीयोपलंभात्स्मृतिरुपलब्धा। शाकुं· विसमं वि
दंतेणार्त्ती अज्जउत्तस्स पच्चअकाले उल्लहद्द्याणि· राजा· तेन ऋतुसमवायचिह्नं प्रतिपद्यतां लता
कुसुमं· शाकुं· णतेविस्ससामि अज्जउत्तो एव्व णं धारेदु ततः प्रविशति मातलिः दिष्ट्या धर्मप
त्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान्वर्द्धते· राजा· अभूत्संपादितस्वादु फलो मे मनो
रथः मातले न खलु विदितोयमाखण्डलेन स्यात्। मात· किमीश्वराणां परोक्षं एत्वा
सुष्मन्· भगवान् मारीचस्ते दर्शनं वितरति· राजा· शाकुं तले अवलंब्यतां पुत्रः त्वां पुरस्कृत्य

द्र

रानीतीस्मृतिशैथिल्यात्प्रत्यादिशन्नपराद्धोस्मि तत्र भवतो युष्मत्सगोत्रस्य कण्वस्य:
पश्चादंगुलीयकदर्शनादूढपूर्वां दुहितरमवगतोहं· तच्चित्रमेव प्रतिभाति मे। यथा गजेनेति·
72 समक्षरूपेतस्मिन्नतिक्रामति संशयः स्यात्। पदानि दृष्ट्वा तु भवेत्प्रतीतिस्तथाविधो मे
मनसो विकारः। मारीचः। वत्स अलमात्मापराधशंकया। संमोहोपि त्वय्युपपन्नः। श्रूयतां
रि.४ राजा। अवहितोस्मि। मारीचः। यदैवाप्सरस्तीर्थावतारणात्प्रत्यक्षवैक्लव्यां शकुंतलामादाय
मेनका दाक्षायणीमुपगता। तदैव ध्यानादवगतोस्मि· दुर्वाससः शापादियं त
पस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा नान्यथेति। स चायमंगुलीयकदर्शनावसा २२
नः। राजा। सोच्छ्वासं· एवं वचनीयान्मुक्तोस्मि। शाकुं। स्वगतं। दिट्ठिआ अकारणपच्चादेसी

अदितिः भवद्ध अप्पडिरहो होहि। शाकु। दारअ अहिदाओ पाअवंदणं करोमि। मारीचः। वत्से आखं
डलसमो भर्ता जयंत प्रतिमः सुतः। आशीरन्या न ते योग्या पौलोम्या मंगलीभव। अदितिः जादे भ
त्तुणो अहिमदा होहि। अवअं दीहाउ वच्छओ उहअकुलणंदणो होदु। उपविशत। सर्वे प्रजापति
मभितउपविशंति। मारीचः एकैकं निर्दिशन्। दिष्ट्या शकुंतला साध्वी सदपत्यमिदं भवान्
श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतं। राजा। भगवन् प्रागभिप्रेतसिद्धिः पश्चाद्दर्शनं अ
पूर्वः खलु वो अनुग्रहः कुतः। उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदनंतरं पयः। निमि
त्तनैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्तु संपदः। मातः एवं विधातारः प्रसीदंति॥
राजा। भगवन्निमामाज्ञाकरीं वो गांधर्वविवाहविधिनोपयम्य कस्यचित्कालस्य बंधुभि

नेवमः [illegible] यतमुन्नयत्वे[illegible]कानुयन्माहदीयेः॥ राजा॥ भगवन् यथा
स्मियतिष्ये॥ मारीचः॥ किन्ते भूयः प्रियमुपहरामि॥ राजा॥ अतः परमपि प्रियम
72 भगवान् प्रसन्नः॥ प्रियेकर्तुमिच्छातित हीदमस्तु॥ भरतवाक्यं॥ प्रवर्ततां प्र
पार्थिवः सरस्वती श्रुतमहतां महीयसां॥ स्तत्र अपि क्षपयतु नीललोहितः पु
रिगतशक्तिरात्मभूः॥ मारीचः॥ एवमस्तु॥ ॥ ॥७॥ इति निःक्रा
र्वे सप्तमोङ्कः॥ ॥ समाप्तमिदमभिज्ञानशाकुन्तलं नामनाटकं॥ का
श्रीकालिदासविरचितं॥ ग्रंथसंख्या १५०४॥ संवत् १६४२का॥ चैत्र वदी ११॥
नमः॥